वाजसनेयि-माध्यन्दिन-शुक्लयजुर्वेदसंहिता

(उदीच्यः पाठः)

[डॉ॰ नरेशकुमारधीमान्, प्राचार्य दोआबा कॉलेज जालन्धर (पंजाब)— इत्यनेन विकसित-सॉफ्टवेयर-माध्यमेन परिवर्तितः कात्यायन-महर्षिप्रणीत-शुक्लयजुर्वेद-प्रातिशाख्यानुमतो वाजसनेयि-माध्यन्दिन-शुक्लयजुर्वेदीयोदीच्यपाठः]

(उदात्तस्वराङ्कनसहितः)

प्रथमोऽध्यायः

इषे त्त्वोर्ज्जे त्त्वा व्वायवं स्त्थ देवो व्वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय
कर्म्मणऽआ प्प्यायद्ध्वमग्घ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयुक्ष्मा मा व
स्त्तेनऽईशत माघशंसो द्ध्रुवाऽअस्म्मिन्न्गोपतौ स्यात बह्व्वीर्य्यजमानस्य
पशून्पाहि ॥१॥

व्वसोः पवित्त्रमसि द्द्यौरसि पृथिव्व्यसि मातरिश्श्वनो घर्म्मोसि
व्विश्श्वधाऽअसि। परमेण धाम्म्ना दृꣳहस्व मा ह्व्वार्म्मा ते
यज्ञपतिर्ह्व्वार्षीत् ॥२॥

व्वँसोः॑ पुवित्त्र॑मसि शुतँधा॑रुँव्वँसोः॑ पुवित्त्र॑मसि सुहँस्र॑धारम्। देवँस्त्वा॑ सविता॑ पु॑नातु व्वँसोः॑ पुवित्त्रे॑ण शुतँधा॑रेण सुप्प्वा काम॑धुक्षः ॥३॥

सा व्विश्वायु॑ः सा व्विश्वक॑र्म्मा सा व्विश्वधा॑याः। इन्द्र॑स्य त्त्वा भागँ सोमेना तं॑नच्च्मि व्विष्णो॑ हव्व्यँ र॑क्ष ॥४॥

अग्ने॑ व्व्रतपते व्व्रुतञ्च॑रिष्यामि तच्छ॑केयन्तन्मे॑ राद्ध्यताम्। इदमहमनृ॑तात्सुत्त्यमुपै॑मि ॥५॥

कस्त्वा॑ युनक्ति स त्वा॑ युनक्ति कस्म्मै त्त्वा युनक्ति तस्म्मै त्त्वा युनक्ति। कर्म्म॑णे व्वा॑ व्वेषा॑य व्वाम् ॥६॥ ॥१॥

प्रत्यु॑ष्टँ रक्ष॑ः प्रत्यु॑ष्टाऽअरा॑तयो निष्ट॑प्तँ रक्षो निष्ट॑प्ताऽअरा॑तयः। उर्व्वन्तरि॑क्षमन्वे॑मि ॥७॥

धूर॑सि धूर्व्व धूर्व्व॑न्तन्धूर्व्व तय्योस्मान्धूर्व्व॑ति तन्धूर्व्व यव्वयन्धूर्व्वा॑मः। देवाना॑मसि व्वह्नि॑तमँ सस्नि॑तमम्पप्रि॑तमञ्जुष्ट॑तमन्देवहू॑तमम् ॥८॥

अह्रु॑तमसि हविर्द्धानन्दृँहस्व मा ह्व्वार्म्मा ते॑ युज्ञप॑तिर्ह्व्वार्षीत्। व्विष्णु॑स्त्वा क्क्रमतामुरु व्वाता॑याप॑हतँ रक्षो यच्छ॑न्ताम्पञ्च॑ ॥९॥

देवस्य॑ त्त्वा सवितुः प्र॑सुवेश्विनो॑र्ब्बाहुब्भ्या॑म्पूष्णो हस्ता॑ब्भ्याम्। अग्नये जुष्ट॑ङ्गृह्णाम्म्युग्नीषोमा॑ब्भ्याञ्जुष्ट॑ङ्गृह्णामि ॥१०॥

भूताय॑ त्वा नारा॑तये स्व॒रभिविक्ख्ये॑षन्दृँह॑न्तान्दुर्य्याः॑ पृथिव्याम्मुर्व्व॒न्तरि॑क्षुमन्न्वे॑मि। पृथिव्यास्त्वा नाभौ सादयाम्म्यदि॑त्त्याऽउपस्त्थेऽग्ग्ने॑ हव्व्य॑ रक्क्ष ॥११॥

पवित्त्रे॑ स्त्थो व्वैष्णव्व्यौ॑ सवितुर्व्वः प्रसुव॑ उत्पु॑नाम्म्यच्छि॑द्रेण पवित्त्रे॑ण सूर्य्य॑स्य रश्मिभिः॑। देवी॑रापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोऽग्ग्र॑ऽइमम॒द्य य॒ज्ञन्न॑यताग्ग्रे॑ य॒ज्ञप॑तिः सुधातु॑य्यज्ञप॑तिन्देवयुव॑म् ॥१२॥

युष्म्माऽइन्द्रो॑वृणीत व्वृत्रतू॑र्य्ये युयमिन्द्र॑मवृणीद्ध्वव्वृत्रतू॑र्य्ये प्रोक्षि॑ता स्त्थ। अग्ग्नये॑ त्वा जुष्टम्प्रोक्क्षा॑म्म्यग्ग्नीषोमा॑ब्भ्यान्त्वा जुष्टम्प्रोक्क्षा॑मि। दैव्व्या॑य कर्म्म॑णे शुन्धद्ध्वन्देवयज्ज्यायै यद्वोऽशु॑द्धाः पराजघ्नुरिदव्वस्तच्छु॑न्धामि ॥१३॥

शर्म्मा॑स्यव॑धूतँ रक्क्षोऽव॑धूताऽअरा॑तयोऽदि॑त्त्यास्त्वग॑सि प्रति त्वादि॑तिर्व्वेत्तु। अद्रि॑रसि व्वानस्प्पत्त्यो ग्ग्रावा॑सि पृथुबु॑द्ध्नः प्रति त्वादि॑त्त्यास्त्वग्वे॑त्तु ॥१४॥

अग्ग्नेस्तनूर॑सि व्वाचो व्विसर्ज्ज॑नन्देववी॑तये त्वा गृह्णामि बृहद्ग्ग्रा॑वासि व्वानस्प्पत्त्यः स ऽइदन्देवेब्भ्यो॑ हविः शमीष्व सुशमि शमीष्व। हवि॑ष्कृदेहि हवि॑ष्कृदेहि॑ ॥१५॥

कुक्कुटोऽसि मधु॑जिह्वऽइषमूर्ज्जमा व्वद त्वया॑ व्वयँ सङ्घातँसङ्घातञ्जेष्म्म व्वर्षवृ॑द्धमसि प्रति॑ त्वा व्वर्षवृ॑द्धव्वेत्तु परा॑पूतँ

रक्ष॒ः परा॑पूता॒ अरा॑तयोप॑हता॒ः रक्षो॑ वा॒युर्व्वो॒ वि वि॑नक्तु दे॒वो व॑ः सवि॒ता हि॑रण्यपाणि॒ः प्रति॑ गृब्भ्णा॒त्त्वच्छि॑द्द्रेण पा॒णिना॑ ॥१६ ॥

धृष्टि॑र॒स्यपा॑ऽग्ने॒ऽअ॒ग्निमा॒मा॑दञ्जहि॒ निष्क्र॒व्यादं॑ः सेधा॒ दे॑व॒यञ्ज॑व्वह। ध्रु॒वम॑सि पृथि॒वीन्दृ॑ःह ब्र॒ह्म॒व॒नि॑ त्त्वा क्षत्त्र॒व॒नि॑ सजात॒व॒न्न्यु॒प॑ दधा॒मि॒ भ्रातृ॑व्व्यस्य व्व॒धाय॑ ॥१७ ॥

अग्ने॒ ब्रह्म॑ गृब्भ्णीष्व ध॒रुण॑मस्य॒न्तरि॑क्षन्दृ॒ःह ब्र॒ह्म॒व॒नि॑ त्त्वा क्षत्त्र॒व॒नि॑ सजात॒व॒न्न्यु॒प॑ दधा॒मि॒ भ्रातृ॑व्व्यस्य व्व॒धाय॑। ध॒र्त्त्रम॑सि॒ दिव॑न्दृ॒ःह ब्र॒ह्म॒व॒नि॑ त्त्वा क्षत्त्र॒व॒नि॑ सजात॒व॒न्न्यु॒प॑ दधा॒मि॒ भ्रातृ॑व्व्यस्य व्व॒धाय॑। व्विश्वा॑ब्भ्य॒स्त्त्वाशा॑ब्भ्य॒ऽउप॑ दधा॒मि॒ चित॑ स्त्थोर्द्ध्व॒चितो॒ भृगू॑णा॒मङ्गि॑रसा॒न्तप॑सा तप्प्यद्ध्ध्वम् ॥१८ ॥

शर्म्मा॒स्यव॑धूत॒ः रक्षोव॑धूता॒ऽअरा॑त॒योदि॑त्त्या॒स्त्वग॑सि॒ प्प्रति॒ त्त्वादि॑तिर्व्वेत्तु। धि॒षणा॑सि पर्व्व॒ती प्प्रति॒ त्त्वादि॑त्त्या॒स्त्वग्वे॑त्तु दि॒व स्कम्भ॒नीर॑सि धि॒षणा॑सि पार्व्वते॒यी प्प्रति॑ त्त्वा पर्व्व॒ती व्वे॑त्तु ॥१९ ॥

धा॒न्न्य॒मसि धि॒नु॒हि दे॒वान्प्रा॒णाय॑ त्त्वोदा॒नाय॑ त्त्वा व्व्या॒नाय॑ त्त्वा। दी॒र्घाम॒नु प्प्रसि॑ति॒मायु॑षे धान्दे॒वो व॑ः सवि॒ता हि॑रण्यपाणि॒ः प्रति॑गृब्भ्णा॒त्त्वच्छि॑द्द्रेण पा॒णिना॒ चक्षु॑षे त्त्वा म॒हीना॒म्पयो॑सि ॥२० ॥

देवस्य त्वा सवितुः प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्। सँव्वपामि समापऽओषधीभिः समोषधयो रसेन। सꣳ रेवतीर्ज्जगतीभिः पृच्यन्ताꣳ सम्मधुमतीर्म्मधुमतीभिः पृच्यन्ताम् ॥२१॥

जनयत्यै त्वा सँय्यौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्म्मोसि व्विश्वायुरुरुप्प्रथाऽउरु प्प्रथस्वोरु ते यज्ञपतिः प्रथतामग्निष्टे त्वचम्मा हिꣳसीद्देवस्त्वा सविता श्श्रपयतु व्वर्षिष्ठेधि नाके ॥२२॥

मा भेर्म्मा सँव्विक्क्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्य प्प्रजा भूयात्त्रिताय त्वा द्विताय त्वैकताय त्वा ॥२३॥

देवस्य त्वा सवितुः प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्। आ ददेऽध्वरकृतन्देवेब्भ्यऽइन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा व्वायुरसि तिग्मतेजा द्विषतो व्वधः ॥२४॥

पृथिवि देवयजन्योषध्ध्यास्ते मूलम्मा हिꣳसिषँव्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान देव सवितः परमस्याम्पृथिव्याꣳ शतेन पाशैर्य्योस्मान्द्वेष्टि यञ्च व्वयन्द्विष्मस्तमतो मा मौक् ॥२५॥

अपाररुम्पृथिव्यै देवयजनाद्वद्ध्यासँव्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान देव सवितः परमस्याम्पृथिव्याꣳ शतेन पाशैर्य्योस्मान्द्वेष्टि यञ्च व्वयन्द्विष्मस्तमतो मा मौक्। अररो दिवम्मा पप्तो द्रप्सस्ते द्याम्मा स्कन्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान देव सवितः

परमस्यांपृथिव्याँ शतेन पाशैर्य्योस्मान्द्वेष्टि यञ्च व्वयन्द्विष्मस्तमतो मा मौक् ॥२६ ॥

गायत्रेण त्वा छन्दसा परि गृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि। सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्ज्जस्वती चासि पयस्वती च ॥२७ ॥

पुरा क्क्रूरस्य व्विसृपो व्विरप्शिन्नुदादाय पृथिवीञ्जीवदानुम्। यामैरयँश्चन्द्रमसि स्वधाभिस्तामु धीरासोऽअनुदिश्य यजन्ते। प्रोक्षणीरासादय द्विषतो व्वधोसि ॥२८ ॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः। अनिशितोऽसि सपत्नक्षिद्वाजिनन्त्वा व्वाजेद्ध्यायै सम्मार्ज्मि। प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः। अनिशिताऽसि सपत्नक्षिद्वाजिनीन्त्वा व्वाजेद्ध्यायै सम्मार्ज्मि ॥२९ ॥

अदित्यै रास्नासि व्विष्णोर्व्वेष्प्पोस्यूर्ज्जे त्वाऽदब्धेन त्वा चक्षुषाव पश्यामि। अग्नेर्जिह्वासि सुहूर्देवेब्भ्यो धाम्ने धाम्ने मे भव यजुषेयजुषे ॥३० ॥

सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।

तेꣳजो॑सि शुक्रꣳम॑स्युमृꣳत॑मसि धाꣳमु नाꣳमा॑सि प्प्रियुꣳन्देवाꣳनामुꣳना॑धृष्ट्न्देवुयुꣳज॑नमसि ॥३१ ॥

॥ इति प्रथमोऽध्यायः ॥